9YLTDAR

# सङ्कलनात्मकं मूल्याङ्कनम् – I (2015-16)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | – | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | – | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | – | 35 अङ्काः |

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

आलस्यम् मनुष्याणां महारिपुः अस्ति। तथैव अहङ्कारः अपि मनुष्याणां महारिपुः अस्ति। यथा आलस्यं तथा अहङ्कारः। आलस्ययुक्तः मानवः स्वजीवने किमपि न करोति तथैव अहङ्कारी मानवः अपि स्वप्रयत्नेन जीवने सफलः भूत्वा उच्चपदेषु तु उपवेष्टुम् शक्नोति; परञ्च तस्यात्मा सर्वदा तं धिक् करोति।

अलसः कदापि एकं पदम् अपि चलितुम् न शक्नोति। सः अधीरः, अकर्मण्यः, मूर्खः च भवति। मनुष्यः भूत्वा अपि सः विषाणपुच्छाभ्यां विहीनः पशुः सदृशः एव। जीवने अलसपुरुषस्य अहङ्कारी पुरुषस्य च द्वयोः अपि अधोगतिः भवति। अतः जीवने कदापि जनैः आलस्यम् अहङ्कारश्च न करणीयौ। परिश्रमं कृत्वा जनाः उच्चापदासीनाः भूत्वा निरहङ्काराः एव न्यायस्य मार्गे चलन्तु इति शास्त्रवाक्यम्।

**I. एकपदेन उत्तरत।**

(i) मनुष्याणां प्रथमः महारिपुः कः?

(ii) उच्चपदेषु कः उपवेष्टुम् शक्नोति?

**II. पूर्णवाक्येन उत्तरत।**

(i) शास्त्रवाक्यम् किम्?

(ii) अलसस्य के गुणाः अत्र कथिताः?

**III. निर्देशानुसारम् उत्तरत।**

(i) 'शत्रुः' इति शब्दस्य पर्यायपदम् अनुच्छेदे किम्?

(अ) रिपुः (ब) अहंकारी

(स) धूर्तः (द) पशुः

(ii) ‘विद्वान्’ इति शब्दस्य विलोमपदं किमस्ति?

(अ) मूर्खः (ब) धूर्त्तः

(स) अधीरः (द) पशुः

(iii) ‘चलन्तु’ इति पदस्य कर्तृपदं किमस्ति?

(अ) आलसाः (ब) परिश्रमिणः

(स) जनाः (द) उच्चपदासीनाः

(iv) ‘एकं पदमपि न चलितुम् शक्नोति’ अत्र पदस्य विशेषणं किमस्ति?

(अ) अपि (ब) एकम्

(स) न (द) शक्नोति

**IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।**

## खण्डः ‘ख’

## रचनात्मक-कार्यम् - ( 15 अङ्काः )

2 **विद्यालयस्य पुस्तकालयाय संस्कृतपत्रिकाः क्रेतुम् प्रधानाचार्याम् प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। (½ x 10)** 5

__(i)__

प्रधानाचार्या महोदया,

राजकीयः बालिका-विद्यालयः,

नरेला

दिल्ली

दिनाङ्कः ------

विषयः - पुस्तकालयाय संस्कृतपत्रिकाणां क्रयः।

आदरणीये!

सविनयं निवेदनमस्ति यत् अस्माकं __(ii)__ पुस्तकालये अन्यभाषाणां पत्रिकाः तु आयान्ति परं संस्कृतस्य नैव। एतत् तु __(iii)__ अस्ति। पुस्तकालये आंग्लभाषायाः तु अनेकाः __(iv)__ सन्ति परम् अधिकतराः बालाः आंग्लभाषाम् __(v)__ समर्थाः न सन्ति। वयं वाञ्छामः यत् पुस्तकालयाय ‘गीता प्रेस’ इति __(vi)__ प्रकाशिताः संस्कृतपत्रिकाः समाचारपत्राणि च क्रीणातु। येन __(vii)__ ज्ञानं ग्रहीतुं __(viii)__ भवेयुः। आशास्ति यत् __(ix)__ अस्माकम् इमाम् __(x)__ अवश्यं पूरयिष्यति।

धन्यवादः

प्रार्थिन्यः

नवमकक्षायाः छात्राः

**मञ्जूषा**

शोचनीयम्, समर्थाः, सेवायाम्, विद्यार्थिन्यः, याच्ञाम्, विद्यालयस्थ, पत्रिकाः, भवती, संस्थानेन, अवगन्तुम्।

3 **चित्रम् आधृत्य मञ्जूषापदानां-सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।** 10



**मञ्जूषा**

सूर्यः, वृक्षाः, वृषभौ, पुष्पाणि, कृषकः, हलम्, कुटीरः, विकसन्ति, भ्रमन्ति, कर्षति, उदेति, भ्रमराः, पक्षिणः, मार्गः, प्राकृतिकम्, सूर्योदयः, तित्तिलिकाः, पर्वताः।

**अथवा**

**'शिक्षायाः महत्त्वम्' इति विषयमाधृत्य मञ्जूषापदानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।** 10

**मञ्जूषा**

अधुना, जनाः, अतिमहत्वपूर्णम्, अस्ति, सफलाः, भवन्ति, पालनं, समयः, करोति, करणीयम्, अत्र, अपि, ज्ञातवान्, जानन्ति, पठन्ति, कार्याणि।

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 **अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत -** 4

(i) न् - वर्णस्य उच्चारणस्थानम् किम्?

(ii) षडाननः - इति पदे मूर्धन्यं वर्णं लिखत।

रिक्तस्थानं पूरयत -

(iii) परिश्रमः- प् + अ + र् + इ + __________ + र् + अ + म् + अः

(iv) व् + इ + द् + य् + आ + र् + थ् + ई =__________

5 **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** 5

(i) हिमालयः अस्माकं देशस्य प्रहरी अस्ति।

(ii) गण + ईशः लम्बोदरः अपि कथ्यते।

(iii) दानेनतुल्यो निधिः + अस्ति नान्यः।

(iv) जगदीशः किं पठति?

(v) नकुलः तच्चरणयोः अलुठत्।

6 **प्रदत्तविकल्पेभ्यः उचितशब्दरुपाणि चित्वा रिक्तस्थानानि पूरयत।** 5

(i) __________ तूष्णीं भूत्वा उपविश पठ च।

(अ) पुस्तकालयः (ब) पुस्तकालयम्

(स) पुस्तकालये (द) पुस्तकालस्य

(ii) भारते __________ सम्मानं भवति।

(अ) कवीनाम् (ब) कविषु

(स) कविभिः (द) हे कवे!

(iii) त्वं स्व - __________ निपुणतायाः प्रमाणं यच्छ।

(अ) मतिः (ब) मतेः

(स) मतिम् (द) मत्याम्

(iv) एतत् _________पुस्तकम् मम नास्ति।

(अ) लघू (ब) लघु

(स) लघुम् (द) लघुः

(v) __________ तत्र तिष्ठति, सः मम भ्राता अस्ति।

(अ) या (ब) यम्

(स) यः (द) यस्य

7 **अधोलिखितविकल्पेभ्यः धातोः उचितं रूपं चित्वा रिक्तस्थानानि पूरयत -** 5

(i) यूयम् स्वदेशं किमर्थं न __________ ?

(अ) गच्छसि (ब) गच्छन्ति

(स) गच्छध्वम् (द) गच्छथ

(ii) वन्दना भ्रातुः पत्रम् __________ ।

(अ) अलभत (ब) अलभथाः

(स) अलभेथाम् (द) अलभे

(iii) ते सर्वे उच्चैः __________ ।

(अ) हसति (ब) हससि (स) हसथः (द) हसन्ति

(iv) मम भगिनी मातरम् __________ ।

(अ) सेविष्यते (ब) सेविष्येते

(स) सेविष्यन्ते (द) सेविष्यसे

(v) अद्य वयं __________ ।

(अ) पठति (ब) पठतः

(स) पठन्ति (द) पठामः

8 **कोष्ठकगतशब्देषु उचितविभक्तिप्रयोगेन वाक्यानि पूरयत।** 5

(i) इमम् (नगर) __________ परितः राजपथम् वर्तते।

(ii) कृष्णः (कंस) __________ अलम्।

(iii) (सेना) ______ पुरतः सेना-संचालकः अस्ति।

(iv) ओ उम् (अग्नि)______ स्वाहा।

(v) यूयम् (कक्षा)______ बहिः मा गच्छत।

9 **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत।** 6

(i) फलं <u>वि+चिन्त्+ल्यप्</u> (__________) कार्यं कुरु।

(ii) आतङ्कवादिनः जनान् <u>हत्वा</u> (_____+ _____) मारयन्ति।

| | | | |
|---|---|---|---|
| | | (iii) सः अनेकान् विषयान् स्मर्तुं (_____+ _____) समर्थः।<br>(iv) बालकः स्यूतं नी+क्त्वा (__________) विद्यालयं गच्छति।<br>(v) क्रीडकः पदकं प्राप्य (_____+ _____+ _____) प्रसन्नः अभवत्।<br>(vi) जनाः जलम् आ+नी+तुमुन् (__________) दूरं गच्छन्ति। | |
| | | **खण्ड : 'घ'**<br>**पठित-अवबोधनम् - 35 अङ्कः** | |
| | 10 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।(2+1+2)**<br>**गद्यांशः**<br>महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच — हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्।<br>**प्रश्नाः**<br>**I. एकपदेन उत्तरत।**<br>(i) श्वेतकेतुः कस्य पुत्रः आसीत्?<br>(ii) श्र्वतकेतुः सार्थान् कान् अधीत्य पितुः समीपम् आगच्छत्?<br>**II. पूर्णवाक्येन उत्तरत।**<br>श्वेतकेतुः आचार्यम् उपेत्य कतिवर्षपर्यन्तम् अवसत्?<br>**III. उचितम उत्तरम् चित्वा लिखत।**<br>(i) 'सः सर्वान् वेदान्' अत्र 'सः' इति पदस्य प्रयोगः कस्मै अभवत्?<br>(अ) पुत्राय (ब) गुरवे (स) श्वेतकेतवे (द) आरुणेः<br>(ii) 'उद्धतस्वभावः' इति पदस्य अनुच्छेदे विशेष्यपदं किम्?<br>(अ) मन्यमानः (ब) सः (स) अहम् (द) सर्वश्रेष्ठः | 5 |
| | 11 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।(2+1+2)**<br>**पद्यांश :**<br>**गच्छन् पिपीलको याति योजनानां शतान्यपि।**<br>**अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।**<br>**I. एकपदेन उत्तरत।**<br>(i) कः गच्छन् योजनानां शतान्यपि गच्छति?<br>(ii) अगच्छन् पदमेकं कः न गच्छति?<br>**II. पूर्णवाक्येन उत्तरत।**<br>गच्छन् पिपीलकः कति योजनानि गच्छति?<br>**III. उचितम् उत्तरं चित्वा लिखत।**<br>(i) अस्मिन् श्लोके 'गच्छति' पदस्य किम् अन्यत् पर्यायपदं प्रयुक्तम्?<br>(अ) गच्छन् (ब) याति (स) गच्छति (द) अगच्छन्<br>(ii) 'गच्छति' क्रियापदस्य कर्तृपदम् किम् अस्ति?<br>(अ) वैनतेयः (ब) पिपीलकः (स) गच्छन् (द) अगच्छन् | 5 |

| | | |
|---|---|---|
| 12 | **अधोलिखितं नाट्यांशं पठित्वा तदनु प्रश्नान् उत्तरत।(2+1+2)**<br>रामः – मे शापितो न परिरक्षसि चेत् स्वराज्यम्।<br>भरतः – हन्त! अनुत्तरम् अभिहितम्। भवतु, समयतः ते राज्यं परिपालयामि।<br>रामः – वत्स ! कः समयः ?<br>भरतः – मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुम् इच्छामि।<br>रामः – एवमस्तु।<br>भरतः – आर्य ! अन्यमपि वरं हर्तुम् इच्छामि।<br>रामः – वत्स! किमिच्छसि? किमहं ददामि? किम् अहम् अनुष्ठास्यामि?<br>**I. एकपदेन उत्तरत।**<br>(i) भरतः समयतः किं परिपालयितुम् इच्छति?<br>(ii) अनुत्तरः कः अभवत्?<br>**II. पूर्णवाक्येन उत्तरत।**<br>भरतः समयस्य विषये रामं प्रति किम् अवदत्?<br>**III. उचितम् उत्तरम् चित्वा लिखत।**<br>(i) 'ददामि' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) अहम् (ब) तव (स) मे (द) किम्<br>(ii) 'करे' इत्यर्थे अत्र किं पदं प्रयुक्तम्?<br>(अ) राज्ये (ब) हस्ते (स) मे (द) किम् | 5 |
| 13 | **अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत।**<br>(i) ऐश्वर्यस्य विभूषणं सुजनता।<br>(क) वैभवस्य आभूषणम् सज्जनता अस्ति।<br>(ख) आभूषणस्य वैभवं सज्जनता अस्ति।<br>(ग) सज्जनतायाः आभूषणम् वैभवम् अस्ति।<br>(ii) अविवेकः परमापदाम् पदम्।<br>(क) विवेकिता संकटानाम् स्थितिः।<br>(ख) विवेकशून्यता विपदाम् स्थितिः।<br>(ग) अविवेकिता परमं पदम्।<br>(iii) मार्गारब्धाः सर्वयत्नाः फलन्ति।<br>(क) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।<br>(ख) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।<br>(ग) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।<br>(iv) न शोभते सभामध्ये हंसमध्ये बको यथा।<br>(क) विदुषाम् सभायाम् विद्याविहीनः अज्ञः न शोभते।<br>(ख) विदुषाम् सभायाम् विद्वान् न शोभते।<br>(ग) हंसानाम् सभायाम् बकः न शोभते। | 4 |

| | | | |
|---|---|---|---|
| 14 | **अधोलिखितपद्यद्वयस्य अन्वययोः रिक्तस्थानानि मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत।(½ x8)**<br>**I.** सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम्।<br>अचिरेणैव कालेन भरतेनाद्य सञ्चितम्।।<br>**अन्वयः** – मया सुचिरेण अपि (i)__ किञ्चित् यशः (ii)__ अद्य भरतेन (iii)__ एव कालेन (तत्) (iv)__।<br>**II.** सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।<br>असद्भिः शपथेनापि जले लिखितमक्षरम्।<br>**अन्वयः** – सद्भिः तु (v)__ (एव) प्रोक्तं (vi)__ अक्षरम् (इव भवति)। (vii)__ शपथेन अपि (प्रोक्तम्) जले (viii)__ अक्षरम् (इव भवति)।<br>**मञ्जूषा**<br>अर्जितम्, असद्भिः, कालेन, लीलया, लिखितम्, अचिरेण, शिलालिखितम्, सञ्चितम् | 4 |
| 15 | **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं क्रियताम्।**<br>(i) उद्धतस्वभावः सः <u>पितुः</u> सकाशम् आगच्छत्।<br>(ii) ब्राह्मणः <u>दारिद्र्यात्</u> अचिन्तयत्।<br>(iii) शोकः <u>धैर्यं</u> नाशयति।<br>(iv) ततः <u>भरतः</u> रथेन प्रविशति। | 4 |
| 16 | **अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत।( ½ x 8)**<br>(i) ब्राह्मणः नकुलं बालरक्षार्थं व्यवस्थाप्य गच्छति।<br>(ii) ब्राह्मणः रक्तविलिप्तमुखं नकुलं दृष्ट्वा चिन्तयति,'' नूनं खादितः मे पुत्रः अनेन बालकेन।''<br>(iii) ब्राह्मणः श्राद्धार्थम् राज्ञा निमन्त्रितः भवति।<br>(iv) ब्राह्मणः श्राद्धं गृहीत्वा प्रत्यागच्छति।<br>(v) उज्जयिन्याम् माधवः नाम विप्रः वसति स्म।<br>(vi) गृहस्य अन्तः गत्वा बालकम् स्वस्थं सर्पम् च हतं दृष्ट्वा ब्राह्मणः दुःखी भवति।<br>(vii) सः तत्क्षणं नकुलं व्यापादितवान्।<br>(viii) अतएव उच्यते 'सहसा विदधीत न क्रियाम्'। | 4 |
| 17 | **( क ) प्रसङ्गानुसारम् रेखाङ्कितपदयोः उचितम् अर्थम् चित्वा लिखत।**<br>(i) न नियमं <u>भिन्द्यात्</u>।<br>(अ) खादेत् (ब) द्रुमम्<br>(स) भेदनं कुर्यात् (द) वदेत्<br>(ii) श्वेतकेतुः <u>उद्धतस्वभावः</u> अभवत्।<br>(अ) उपदिष्टः (ब) गर्वान्वितः<br>(स) शालीनः (द) उच्चकुलीनः<br>**( ख ) शब्दानाम् अर्थैः सह मेलनम् कुरुत।**<br>(i) अनृतं शत्रुः<br>(ii) आपः क्षिप्रम्<br>(iii) रिपुः जलम्<br>(iv) आशु असत्यम् | 4 |
| | | | |
| | -o0o0o0- | | |